96255

UPAMANACHINTAMANI

BY

GANGESHOPADHYAYA.


A Celebrated Treatise

ON THE COMPARISON

OF THE NYAYA PHILOSOPHY.

Edited By

PANDIT JIBANANDA VIDYASAGARA B. A.



Calcutta.

PRINTED AT THE SUCHARU JANTRA.

1872

To be had from Pandit Jibananda Vidyasagara B. A. *Govt. Sanscrit College of Calcutta.*

पण्डितकुलतिलक-पूज्यपाद श्रीमत् तर्कवाचस्पति
पाद-प्रणीत-प्रकाशित-पुस्तकान्येतानि ।

१ आशुबोध व्याकरणम् ... ३
२ धातुरूपादर्श: ... २
३ शब्दस्तोम-महानिधि [संस्कृत अभिधान] १०
४ सिद्धान्तकौमुदी—सरलाटीकासहिता ... १
५ सिद्धान्तबिन्दुसार [वेदान्त] ...
६ तुलादानादिपद्धति [बङ्गाक्षरै:] ... १
७ गयाश्राद्धादिपद्धति ...
८ शब्दार्थरत्न ...
९ वाक्यमञ्जरी [बङ्गाक्षरै:] ...
१० छन्दोमञ्जरी तथा वृत्तरत्नाकर—सटीक
११ वेणीसंहार नाटक—सटीक ...
१२ मुद्राराक्षस नाटक—सटीक ...
१३ रत्नावली ...
१४ मालविकाग्निमित्र—सटीक ...
१५ धनञ्जय विजय—सटीक ...
१६ महावीरचरित ...
१७ साङ्गतत्त्वकौ
१८ वैयाकरणभूष
१९ लीलावती
२० बीजगणित
२१ शिशुपालबध—
२२ किरातार्जुनीय
२३ कुमारसम्भव—

तत्त्वचिन्तामणौ


उपमानखण्डः ।

श्रीमद्गङ्गेशोपाध्याय-विरचितः ।

वि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागर भट्टाचार्य्येण
संस्कृतः ।

कलिकाता-राजधान्याम्

मचारुयन्त्रे
मुद्रितः ।



RMIC LIBRARY

श्रीगणेशाय नमः ।

तत्त्वचिन्तामणौ ।

उपमान खण्डः ।

तत्र साधर्म्यप्रमाकरणमुपमानमिति केचित् । सादृश्यञ्च पदार्थोत्तरत्वम् । तथाहि । सदृशव्यवहारगवाधितादृष्टि साधर्म्यम् तच्च न प्रतिपदार्थमेकं अर्थतः सर्वत्रैकजातेरभावात् । तदभावात्पदत्वं सदृशसङ्गत्यवहारस्य तदभावेऽनुपपत्तेश्च न च व्यक्तिसाम्यं सामान्यात्मनि भूयोऽवयवाभ्यां तद्बोधनेति वाच्यं वस्त्वभिधेयत्वेन व्यक्तेरप्रयोजकत्वात् । व्यक्तेरसङ्गतेश्च व्यवहारसिद्धौ अतिरिक्तासिद्धेश्च । नापि वाक्यार्थः साकल्यस्य सङ्केतागोचरत्वात् । तत्रोपस्थितेऽपि साधर्म्यस्यत्वात् । गोरपि रासभात्किञ्चिन्न्यूनत्वात् गौरसि रासभोऽसीत्यतिप्रसङ्गाच्च । प्रत्यक्षेऽपि वा नवयवनिरूपितसादृश्यस्यैव विशिष्टबुद्धिहेतुत्वेन गोविशिष्टस्य चानुपस्थितेरसङ्गः । किञ्च प्रत्यक्षमेव भिन्नम् । नचैकैकव्यभिचारादनुगतरूपासम्भवात्तत्प्रत्ययः साधर्म्यपदव्युत्पत्तिश्च नस्यादिति वाच्यं गोत्वादिना वैधर्म्यसाधर्म्यसामान्यात् समग्रपदार्थोपस्थितेः सादृश्यविशेषवच्च वाक्यात्तत्प्रत्ययसम्भवात् । न चैवं पूर्वं न

गुणः कर्म्म वा गुणकर्म्मवृत्तित्वात् नच सदृशाश्रयवृत्तित्वादेव तत्र व्यवहारः स्वाश्रयवैसादृश्येऽपि तत्र तत्प्रतीतेः । अतएव नाश्रयसादृश्यात् सामग्रीग्रहात् बाधकाभावादविशेषेण वैपरीत्यसम्भवाच्च । नापि सामान्यं तद्धि न सर्ववृत्त्येक मनभ्युपगमात् सुसदृशमल्पसदृशव्यवहारानुपपत्तेश्च । अथ विजातीयत्वे सत्यवयवगुणकर्म्मवृत्ति भूयः सामान्यं तत् अतएव दूरस्थे प्रतियोगिनि भूयः सामान्याज्ज्ञानान्न तत्र सादृश्यप्रत्ययः वलं प्रसाद इतिवत् बहुत्वस्य समुदायस्यैकत्वादेकं सामान्यमिति धीप्रयोगो अन्यथा वलादपि अर्थान्तरं स्यात् सामान्यबहुत्वाल्पत्वाभ्यां सुसदृशमल्पसदृशव्यवहारः तदुच्यते । सामान्यान्येव भूयांसि गुणावयववर्णेषु । भिन्नं प्रधानसामान्य व्यक्तं सादृश्यमिष्यते इति साजात्येऽप्यरपिण्डत्ववत् यमजडयोरवयवादिशून्ये गुणादौ जातौ च सदृशप्रत्ययात् विसदृशयोः करभरासभयोस्तत्त्वाच्च नापि धर्म्यन्तरे धर्म्यन्तरवृत्तिधर्मबाहुल्यम् असाधारणधर्मशून्यत्वे सति तद्गतभूयो धर्मवत्त्वं वा स्वनिष्ठात्यन्ताभावप्रतियोगिधर्मसमानाधिकरणभूयो धर्मवत्त्वं वा त्रिचतुःपञ्चादिभेदेन भूयस्त्वस्यानुगतत्वात् । नापि कपिञ्जलवृत्तित्वपर्य्याप्तत्वं विसदृशयोरपि हस्तिमशकयोः सादृश्यप्रसङ्गात् । तदुक्तम् । एवं जातिगुणद्रव्यक्रियाशक्तिषु धर्मतः । एकैकद्वित्रिसामस्त्यभेदादेकत्व चिन्तेति ॥ अथ व्यावर्त्तकधर्म्मापेक्षया तद्गतधर्मबाहुल्यं सादृश्यबाहुल्यञ्च त्रिचतुरादिष्वनुगतं हस्तिमशकयोस्तु बहुव्यावर्त्तकं साधारणल्पत्वमतएव भेदाधिष्ठानमुच्यते

इति चेन्न व्यावर्त्तकसममल्पेनाल्पेना गणितेनापि सादृश्यव्यवहारात्। किञ्च सामान्यान्याश्रयभेदेनाभिन्नानि भवन्ति सादृश्यन्तु भिन्नम्। सामान्यं निःप्रतियोगिकं तदनिरूप्यञ्च। सादृश्यन्तु सप्रतियोगिकं तद्वीय्यञ्च। अथ भेदेऽपि तद्वत् अयः सामान्यवत्त्वं सादृश्यं भेदश्च प्रत्याश्रयमन्यः सप्रतियोगिकश्चेति चेत्तर्हि सादृश्यस्य भेदघटितत्वेन तस्मात् सदृग इति स्यात् नतु तेन तस्य वा सदृग इति स्यात्। नच सादृश्यस्यापि सप्रतियोगिकत्वे तस्मात् सदृग इति स्यात् अयमर्थो हि तस्मात् प्रतीतिप्रयोगौ नतु प्रतियोगिनि अभावेऽपि तद्वतीति प्रतीतिप्रसङ्गात्॥ अपिच तद्धर्मवत्त्वं यदि सादृश्यं तदा तत्तानत्वयोः सङ्करप्रसङ्गात्। तद्धर्मवत्ता हि तत्ता तदन्याच्च तद्वत्ता यदि च तत्तैव तद्वत्ता तदा तदेव तद्वदिति स्यात्। तथाच तद्धर्मवत्ताज्ञाने प्रत्यभिज्ञानवत् सोऽयमिति स्यात् नतु तद्वदिति। एवं तद्वत्तैव हि तत्तेति गवयेऽपि गोबुद्धिव्यपदेशौ स्याताम् गोगतसामान्ययोगित्वेन गोवत्तत्ताश्रयत्वात् नापि विशेषः प्रत्यक्षत्वात् न समवायः वृत्तिमत्त्वात्। इत्यतिरिक्तं सादृश्यं यत्तु सादृश्यं भावोऽभावो वा भावोऽपि सगुणैर्निर्गुणैर्वा निर्गुणमप्याश्रित मनाश्रितं वा। आश्रितमपि सामान्यवन्निःसामान्यं वा सामान्यवत्त्वे स्यन्दोऽस्यन्दो वा निर्गुणं निःसामान्यमाश्रित मनाश्रितमनेकाश्रितं वा। इति यथायथं सप्तपदार्थान्तर्गतमिति तन्न व्यवहारानुपपत्त्या तद्बहिर्भावात् अन्यथैतादृग्विकल्पेन सामान्यविशेष समवायानामपि द्रव्यादित्रयधर्म्मान्तर्गतत्वं स्यादिति॥ ०॥ उच्यते॥ ०॥ असाधा

रणान्यनङ्गतवच्छ्रधर्मवत्त्वं तत्सादृश्यं यमजाद्यादि साधारणं भेदाघटिततया च निरवधि तङ्गतवच्छ्रधर्मवत्त्वं तन्निरूप्यमिति तन्निरूप्यत्वमेव तस्य सप्रतियोगिकत्व तवापि सादृश्ये तदेव सप्रतियोगिकत्वं नतु भेददीर्घादिवच्छात्रधित्वं तस्मात् सदृग इति प्रत्ययापत्तेः । वच्छवच्च त्रिचतुरादिसाधारणमिति नानुगमः । न चातिप्रसङ्गः हस्तिमशकयोरपि प्राणित्व सुखित्वदुःखित्वादिना सादृश्यात् अतएव वैसादृश्येऽपि आह्लादकत्वादिना चन्द्र इव सुख वच्छीरत्वादिना महिषीव गौरिति ॥ वच्छत्यनङ्गतधर्मवत्त्वेन सुसदृशमल्पसदृशात् । अत एव गवये गोसादृश्यं सन्नतङ्गर्मवत्त्वमेव विवेचयति वराह गावोऽनुधावन्तीत्यत्र गोसादृश्य वराहेऽप्युक्तम् । तत्रापि वक्त्वेनोपमानोपमेयव्यवहारः काव्यादौ साध्यसाधनवत्तामादायैव दृष्टान्ते पक्षसादृश्य वाक्यकवक्ति प्रयोगः परीक्षकाणाम् । न चैते गौणा मुख्ये बाधकाभावात् । तस्मात् केनचित् कस्यचित् क्वचित् सादृश्यं नलनुगतमस्ति । किञ्च यादृश वच्छतङ्गर्मवत्त्वज्ञानं सादृश्यव्यञ्जकं तदेव तद्व्यवहारनियामकमस्तु किमधिकेन । अन्यथा त्रिचतुरादित्वे तु व्यञ्जकमपि वच्छधर्मवत्त्वमननुगतं स्यात् । व्यञ्जकमननुगतमपि वह्नौ प्रत्यक्षादिवदिति चेन्न तत्तद्व्यक्तीनां वैजात्यात् धूमालोकादौ वह्निव्याप्यत्वमेवानुगतम् । अत्रापि तद्व्याप्यत्वमस्तीति चेत् यादृशं तद्व्याप्यं तदेव तत्तद्व्यवहारनिमित्तं नतु तद्गत वच्छधर्मवत्त्वज्ञानं न व्यञ्जकमेवानुभवविरोधात् तद्गतभूयोधर्मस्य वह्न्यल्पत्वज्ञानं विना सुसदृशमल्पसदृशत्वज्ञानाभावाच्च । अथ

तद्वत्तमत्वधर्मवत्त्वं न सप्रतियोगिकं साहश्यं तु तथेति चेत्-
तर्ह्यन्यमधिकमिति चेत्र साहश्यवत्तस्यापि सप्रतियोगित्वात्
यत्तु तत्तावत्तत्त्वयोः सदृशः स्यादिति तत्र तत्रैव तद्धर्मवत्ता
तद्भेदो वा तत्ता साध्य कोऽयमिति प्रत्यक्षगम्ये भासते । यदि
भासमाने तदन्यस्मिन् तद्धर्मवत्ता तद्वत्ता यतो भवति तद्वदयं
नतु सदृति तयं भेदात् । अन्येवं व्यक्त्यन्तरे गोत्वग्रहे तद्गो-
वदयमिति स्यात्तत्रियमपि गौरिति चेत्र गोत्वमात्रस्य तदन्य-
व्यक्तिवृत्तिग्रहे सदृशत्वः एकत्वनानात्वप्रत्ययगम्यात् । तद्गो-
वृत्ति बहुधर्मज्ञाने भवत्येव गवयत्वावच्छेदेति तथाप्यवश्यमपि
सदृशादिज्ञानमिति समुच्चयधीः स्यात् नतु गौःसदृश इति चेत्र
एकत्वेऽसम्भवतः सदृशयोरुभयगतयोर्धर्मवत्त्वमन्यत्र साहश्य-
मिति विशेषात् । नवीनास्तु । विलक्षणमुखद्वये इतरसकलव्या-
वृत्तावाहश्यमनुभूयते नतु तद्वयमात्रवृत्तिजातिरस्ति तद्वद्वयः
भावे जातिरूपत्वेनानित्यत्वप्रसङ्गात् । नापि अन्यो-
न्याभावोऽतिरिक्तः साहश्यमुपेयं तथापि समानधर्मवत्त्वव्यवहारं
विना कथं तत्र सा.स्याभिव्यक्तिरिति चेत्र प्रतीतिबलात्
द्वये तथा गुणादौत्तु व्यभिचारात् अतएव न व्याकोशव्या
विहिरसम्भवेऽपि साहश्यानुभवादिदोषः । तच्चुच्चं विलक्षण
मुखद्वयं न सुखमात्रहेतुजन्यं सुखान्तरस्यापि तादृग्यत्वापत्तेः
किन्तु विलक्षणादृष्टजन्यं तच्चादृष्टं विलक्षणहेतुक्रियाविशेषा-
सुष्ठात्रादन्येषामप्यस्तीति तेषामपि तादृशानि सुखानि भव-
न्तीति तेषु कारणविशेषप्रयोज्याविलक्षणश्रुति तस्मादाल-
नामानन्त्यात् अनादित्वित्वनत्वादुत्पन्नानागतविजातीयं न

मुखसदृशि एवं दुःखान्तरकार्य्येऽपि नत्वनुत्तमत्वमनुत्तमस्य सामजातीयं कार्य्यमस्ति । यच्च व्यक्तिभेदे जातेरनित्यत्वमापादितं तदपि न नाशकाभावात् अतएव प्रलयेऽपि तदवस्थानम् । अपि चैकत्व प्रतियोगिभेदेन सादृश्यभिन्नं नत्वेकं सदृशसदृशव्यवहारात् तथा च योग्यताद्येकत्वे सर्वं सर्वप्रसङ्गात् । प्रतियोगिगत भूयो धर्मज्ञानस्य व्यञ्जकस्य क्रमाक्रमे तदेव व्यवहारनिमित्तमित्युक्तम् । किञ्चैवं वैसादृश्यमपि स्यात् । नच सादृश्याभावत्वात् वैपरीत्यस्यापि सम्भवात् । सादृश्याभावत्वेनैव प्रतीतिविरुद्धस्य निषेधार्थत्वादिति चेत्तर्हि गोरिव महिषीत्यत्र पावकवत्तीरत्वादिना विवक्षित सादृश्यानाश्रये गवये वैसादृश्यं न स्यात् नहि तत्र गोसादृश्यं तदभावस्य । तस्मात् साधर्म्यवैधर्म्ये सादृश्यवैसादृश्ये । यत्तु तदुक्तानेकधर्मवत्त्वं सादृश्यं तेनाभेदेऽपि गगनं गगनाकारं सागरः सागरोपमः । रामरावणयोर्युद्धं रामरावणयोरिवेत्यादौ सादृश्यं न चैवं गौरपि गोसदृशत्वे गवयपदाभिधेयत्वापत्तिः । तत सदृशपदस्य विशेषे तात्पर्य्यात् । अन्यथा महिषेऽतिप्रसङ्ग इति । तन्न । तस्य तेन वा सदृश इति प्रतीतिप्रयोगात् नचायमेकसम्बन्धः सम्बन्धौ वा सम्भवति । गगनं गगनाकारमित्यादौ तु गगनाद्ये वैताद्दशधर्मवत्तान्यादित्यत्र तात्पर्य्यम् । यद्वा सर्गान्तरीयगगनसागरयोरुपमानत्वं तयोर्युद्धविशेषे तयोरेव युद्धान्तरमुपमानमिति ॥ नन्वयं देवदत्तभृत्यो वा भवतु तथापि सादृश्यावयवयमिति भेदाभेदसंसर्गेऽपि सादृश्यनिश्चयात् अतिरिक्तं सादृश्यमिति चेत् न

देवदत्ताभिप्रायगोकदेशे सादृश्यपदप्रयोगात् कथमन्यथा स एवायं नतु तत्सदृश इति तत्सदृशोऽयं नतु स इति । प्रतीति प्रयोगौ । न चात्र सदृशपदं भेदमात्रपरमिति युक्तं मुख्ये सम्भवति लक्षणाया अयोगात् तस्मान्न पदार्थान्तरं सादृश्यमिति ॥ स्यादेतत् । माभूत् पदार्थान्तरं तथापि प्रत्यक्षाच्छब्दाद्वा गवये गोसादृश्यज्ञानात् गवयसदृशो गौरितिज्ञानमुपमितिः । न चैतत्प्रत्यक्षं विशेष्यासन्निकर्षात् नानुमानं लिङ्गाभावात् । नच गवयगतं सादृश्यं लिङ्गम् अपक्षधर्मत्वात् । अथ सदृशद्वयान्तरदर्शने यो यद्गत सादृश्यप्रतियोगी स तत्सदृश इति प्रत्यक्षेण व्याप्तिग्रहे सति गवयगतसादृश्यप्रतियोगित्वात् । गोगवयसदृश इत्यनुमिति रितिचेत् । व्याप्तिग्रहं विनैव प्रथममपि प्रत्यक्षाच्छब्दाद्वा गोसदृशं गवयं ज्ञात्वा गवि गवय सादृश्यज्ञानोदयात् । किञ्च गविगवयसादृश्यं न साध्यं प्रथमतस्तदप्रतीतेः गवयगतसादृश्यप्रतियोगित्वञ्च गवि न प्रत्यक्षं विशेष्यस्यासन्निकर्षादिति नानुमितिगम्यं तल्लिङ्गस्यापि तद्गतत्वेनाप्रत्यक्षस्य लिङ्गान्तरगम्यत्वेऽनवस्थानात । नच गौरतद्गवयसदृशः गवयगतभूयोऽवयवादिसामान्यवत्त्वात् गवयान्तरवदिति वाच्यं गवयान्तराज्ञानेऽपि गवि गवयसदृशत्वप्रत्ययात् । अतएव गवयगतगोसादृश्यं गो गवयगतसादृश्यं विनानुपपद्यमानं तत्कल्पयति न हि गोसदृशो गवय एतद्विसदृशो गौरितिवाच्यमिति निरन्तरम् । गवयनिरूपितगोसादृश्यप्रसिद्धौ तेन विनानुपपत्तिज्ञानाभावात् किञ्च । तवार्थापत्तिव्यतिरेक्यनुमानं नच गवयगतसादृश्यप्रतियोगित्वं गवि

प्रत्यक्षादिज्ञानात्तु सम्यनिरूपकम्। नन्वेवं करभे गोवैधर्म्य-ज्ञानात् गवि करभवैधर्म्यज्ञानमपि ज्ञानान्तरं स्यादिति चेत् गवि करभवैधर्म्यं यदि करभवृत्तित्वाभावत्वं तदाश्रयते गवि-प्राङ्गास्नित्वादिप्रकारकोपजीव्यत्वेन तत्र करभाभाववृत्तित्वधर्मवत्त्वं तदा गोधर्म्मा गविगता एव इदानीं स्मृत गोधर्म्माणां करभे ऽभावमात्रमधिकं गम्यं तच्च प्रत्यक्षादेव। अथ तत्प्रतियोगि-कैतच्चिष्ठ सादृश्येभासमाने समानसंविद्विषयत्वेनैव प्रति-योगिकतच्चिष्टसादृश्ये वैधर्म्यज्ञानमिति चेन्न विशेषणवि-शेष्यप्रतियोगिभेदेन समानसंविद्विषयत्वासिद्धेः। एतत्सदृश एतद्विधर्म्मा स इत्येतद्विशेष्यक प्रत्ययानुदयाच्च तद्विशेष्यक प्रत्यक्षे तत्सन्निकर्षस्य हेतुत्वात्। नन्वेवं प्रत्यक्षे विशेष्य सन्नि-कर्षोहेतुर्नोक्तयावद्विशेष्य सन्निकर्षोगौरवात् अन्यथातीतानागतव्याप्य विशेष्यकव्याप्तिग्रहश्च न स्यादिति चेन्न अतीता-नागतविशेष्ये सामान्यलक्षणायाः सत्त्वात्। अथ गवयसादृश्यं गवि गवयगतसादृश्यादिसत्त्वं तच्च गवि गोसादृश्ये भासमाने गवि भावनेव यद्वा गोगतसदृश्यत्वादि गवयगतत्वं गवये भासा-दृश्यं एवं तथैव गवयसादृश्य गोगतत्वं गवि गोसादृश्ये तस्मि-न्द्रियेणैवज्ञातसामान्यवैकल्येनेन्द्रियसन्निकृष्टत्वात्। अथ स इति विपरीतप्रत्यभिज्ञयाभिदेति चेत् सत्यं गोनिष्ठविशेष्यक गवय गतसदृश्यत्वादिज्ञानं गोनिष्ठजन्य गोसन्निकर्षात् तस्मादेतत् सदृश एतद्विधर्म्मा एतन्निष्ठः स इतिज्ञानं साधुभासात् विशेष्यासन्निकर्षे तद्ग्रहविलम्बाच्चानात् एवञ्च सप्रतियोगिक-पदार्थज्ञानेन तत्प्रतियोगिकस्मृत्यालम्बनत्वात्प्रमाणं प्रत्यक्षादिक

विनार्थादर्थापत्तौ पूर्व्वेषामुपमाननेतिवार्त्तमेतत् तथा हि। परस्परसदृशं कुल्यादिकं प्रत्यक्षमतो यो यत्सादृश्यप्रतियोगी स तत्सदृश इतिसामान्यतो व्याप्तिज्ञाने सति गौर्गवयसदृश: तत्सादृश्यप्रतियोगित्वात् यथा भ्राता भगिनी। गवयगतसादृश्य प्रतियोगित्वञ्चगोर्गवयगतसादृश्यविशिष्टपेक्षमेव सादृश्ये गो: प्रतियोगित्वे नैवज्ञानात् अन्यथा सादृश्ये गोरनन्वयापत्ति: यत्तद्वां सामान्यतोव्याप्तिग्रहं विना एतत्सदृश: स इति फलासिद्धे: यत्तद्वां व्याप्तिग्रहेऽस्माकं व्यतिरेकी परेषामर्थापत्तिरित्यस्यैवलादृश्यज्ञेभयवृत्तिधर्मस्य किञ्चिद्विशेषमनिरूपयात् प्रत्यक्षेण भानं लादृश्यविशेषमनिरूपयेत्यप्रयोजकत्वात्। अन्यदा ऽयं स इति भ्रान्तविपरीतप्रत्यभिज्ञायां कागति:। मनसैव चैतच्चिन्तादृश्यप्रतियोगित्वपक्ष: प्रत्यक्षविशेषकत्व परानपेक्षं प्रयोजकमित्युक्तम्। कीदृशो गवय इति जिज्ञासायां यथा गौस्तादृशगवय इति श्रुतोत्तरवाक्यस्य तथा भूते पिण्डे दृष्टे तथा गवय इत्यतिदेशवाक्यार्थानुसन्धानेऽयं गवयशब्दवाच्य इति मतिरुपमानफलम् न चेयं वाक्यमात्रात् अप्रत्यक्षीकृतपिण्डस्यापि प्रसङ्गात्। नापि प्रत्यक्षमात्रात् अश्रुतवाक्यस्यापि प्रसङ्गात्। नापि तयो: सहकारात् सहि प्रमाणमसहकारी वा फलसमाहारो वा आद्ये प्रमाणत्वे सति समाहार: समाहारतयोर्वा प्रमाणत्वं फलानेकत्वे समाहारानुपपत्ते: तस्य परस्परसहकारिरूपत्वात् नान्य' वाक्यप्रत्यक्षयोर्भिन्नकालत्वात् वाक्यतदर्थयो: स्मृतिद्वारोपनयेऽपि गवयपिण्डसम्बन्धेनापि इन्द्रियादिना तद्गत सादृश्यानुपनये समयपरिच्छेदासिद्धे:। फलसमा-

हारे च तदन्तर्भावे शब्दानुमानयोरपि प्रत्यक्षत्वप्रसङ्गः। त
किं तत्फलस्य प्रमाणबहिर्भाव एव। अन्तर्भावे वा कियत
सीमा। तत्तदसाधारणेन्द्रियादिसाचिव्यम् अस्ति तर्हि मा
दृश्यज्ञानेऽपि विस्फारितस्य चक्षुषो व्यापारः। न तस्मिन् सा
तस्यानुपयोगात् उपलब्धगोसादृश्यविशिष्टगवयपिण्डस्य वा
क्वार्थस्मृतिमतः कालान्तरे प्यनुसन्धानवत्वात् समयपरिच्छेदो
पपत्तेः। तस्मादागमप्रत्यक्षाभ्यामन्यदेवेदमागमस्मृतिसाचि
सादृश्यज्ञानमुपमानप्रमाणमिति जरन्नैयायिकाजयन्तप्रभृ
तयः॥ तत्र॥ वैधर्म्यापपत्तेः॥ यदोदीच्येन क्रमेलकं निन्दतात
विदूरं मतिदीर्घग्रीव प्रलम्बचपलोष्ठं कठोरं तीक्ष्णकण्ट
कागिनं कुत्सितावयवसन्निवेशसपसदं पशूनामिति तदुपश्रु
दाक्षिणात्य उत्तरापथं गतस्तादृशं वस्तूपलभ्य नूनमसौ करभ
इति प्रत्येति। तत्र किमानं न तावदुपमानं सादृश्याभावात
नच प्रमाणान्तरं सम्भवति॥ उच्यते। न तावदनुगतं प्रवृत्ति
निमित्तमुपलक्षणं विना प्रत्यभिज्ञानतः शरीरैकत्वादिना
शरीरविशेषे चैत्रादिपदवत्तेषपृङ्ग्याद्विकया गवयपदशक्ति
ग्रहे गवयान्तरेऽपि सम्भवात्। नाप्यनध्यक्षे गत्यन्तरोपस्थिते
परिभाषाकाण्डादिपदवत् अतएवाध्यक्षत्वाच्च उपलक्षणस्य च शक्तौ
बहिर्भावात् तद्वदेव। नापि योगनिर्वचनात्पाठकादिवत्
सोपलक्षणे अन्यथा पठिक्रियानुपहिते पठति न प्रयोगः
स्यात्। अतस्तदनुगुणज्ञानादियोगिनि शक्तिः। अवच्छेदक
तया ह्युपलक्षणेऽपीति योगाभावात्। नाप्युपस्थितनिमित्त
सङ्कोचनात् स्वर्गादिपदवत् तदभावात्। अतो गन्धाद्युप-

लक्षितेन पृथिवीत्वेन निमित्तेन पृथिव्यादिपदवत् सादृश्यादुप लक्षिते गवयत्वादौ गवयादिपदानां शक्तिरिति परमार्थतः। अन्यथा फलस्याभासत्वे मानत्वविरोधात्। नच पूर्वं गवयत्वमुप स्थितमुपस्थापकाभावात् (सादृश्यादुपलक्षिते गवयत्वादौ) नच गवयपदादेव तदुपस्थितिरन्योन्याश्रयात्। अथ वाक्या देवानेन समयः परिच्छिन्नः केवलमग्रे प्रत्यभिजानातियोगो सदृशो गवयपदवाच्यत्वेन मयावगतः सोऽयमिति नोपमानस्य विषय इति चेन्न नहि सादृश्यमेव निमित्तसमतीतगुनामव्यवहारप्रसङ्गात् गौरवाच्च नापि गवयत्वं तदनुपस्थितेः। अतएव नोभयं स्मृतं प्रतीतसमयसंक्रान्तये अतिदेशवाक्यप्रयोगानुपपत्तेश्च। गवयत्वेत्वयं व्युत्पन्नो न गोसादृश्ये निमित्तस्य गवयत्वस्य प्रतीतेः। ननु यदा तद्वाक्यं समयपरिच्छेदं पूर्वं नाजीजनत् तदा तदेववाक्यं स्मृतं सत्प्रवृत्तिनिमित्तं क्लेक्ष्यति अध्ययनसमयगृहीत इव वेदराशिरङ्गोपाङ्गपर्यन्तदातस्य कालान्तरे नववाक्यस्येवास्यप्रागेव बोधितत्वात् पर्य्यवसित इति वाच्यं गोः सादृश्येपलक्षणत्वनिमित्तत्वयोः सन्देहात् पश्चाद्गवयत्वेऽवगते तर्कपुरस्कारात्। सादृश्यस्योपलक्षणत्वे गङ्गायां घोष इत्यत्रेवान्वयो भविष्यतीति चेत् न। उपलक्षणनिमित्तत्वसन्देहेऽपि यो गोसदृशः स गवयपदवाच्य इति सामान्याधिकरण्यमात्रेणान्वयोपपत्तौ मानान्तरोपनीतानपेक्षणात् एकारक्तसन्देहेऽपि घटो भवतीति वाक्यवत् अन्यथापर्य्यवसितेऽपि वाक्ये मानान्तरसहकारात् तत्तदन्वयबुद्धौ वाक्यभेदापत्तेः। गङ्गायां घोष इत्यत्र तु पदार्थ एवान्वया योग्य इति

युक्तं तत्र मानान्तरापेक्षणम् । यदि च प्रतीतसंसर्गबल
यातोऽर्थो वाक्यस्यैव तदा वाक्यभेदापत्तिः । अथ तात्पर्य
नुपपत्त्यापत्तौ प्रवेशेतिलक्षणात् गवयपदव्युत्पन्नं प्रति
तदुत्पत्तये वाक्यमात्रेणोक्तं तत्र न प्रवृत्तिनिमित्तोपादा
विना । नच गोसादृश्यं तत्रेति तात्पर्यतो गोसादृश्यपदे
गोसमानाधिकरणं गवयत्वमुपलक्षितं कथ्यते नतु यथा धूमे
ऽग्नीत्यत्र वह्नौ तात्पर्यमनुमानेन निर्वहतीति न लक्षण
न चात्र प्रमाणान्तरमस्तीति येन तन्निर्व्याह्यं अनुमानस्य
भिन्नेः । अन्यथान्योन्याश्रयात् नच वाक्ये न लक्षणा तस्य
पदधर्मत्वादिति वाच्यं एकपद एव लक्षणापदान्तरन्तु नियम
मर्कमित्यस्य वक्तव्यत्वात् । अथ गवयत्वेन लक्षणया तदु
स्थितावपि व्यक्तिवाच्यता न ज्ञापेत शब्दादिति विशिष्टवाच्यत
ग्राहकमानान्तरमवश्यं स्वीकरणीयम् । नच यन्निष्ठो धर्म
यत्पदवाच्यः सोऽपि तद्वाच्य इति नियमः । जातिपदे व्यभि
चारादिति चेत् न प्रवृत्तिवद्वाच्यत्वबोधतात्पर्यकत्वेन न्य
तीति देशवाक्ये गवयत्वविशिष्टव्यक्तेरेव लक्षणात् । अ
गवयत्वे साक्षात् तात्पर्यं गोसादृश्यशब्दस्यगट्यते तदा लक्षण
नच साक्षात् तात्पर्यमवधृतम् अन्यथा धूमोऽग्नीत्यत्रापि स
स्यादिति चेत् न उपस्थापकान्तराभावे तात्पर्यस्यैव साक्षा
तात्पर्यरूपत्वात् नचोपमानमेव तथा अन्योन्याश्रयात् ॥ ए
यत्र प्रवृत्तिनिमित्तविषयबोधने न तात्पर्यं योगोसदृश्यः
गवयशब्दवाच्य इति स्वरूपाख्यानमात्रं तत्रापुक्तसामग्री
संशयपरिच्छित्तिर्भवत्येव नच व्युत्पित्सु व्युत्पत्तये प्रवृत्ति

निमित्तविशेषे तात्पर्य्यं यदनुपपत्तिर्लक्षणाबीजं स्यात्। किञ्च, धिक् करभमतिदीर्घग्रीवमित्यादिवाक्यस्य (करभमतिदीर्घग्रीवमित्यादिवाक्यस्य) करभनिन्दातात्पर्य्यकस्य प्रवृत्तिनिमित्तपरत्वाभावेऽपि तादृशपिण्डमनुभवतः स्मरतश्च वाक्यार्थमयं करभशब्दवाच्य इति भवति मतिः। नच तत्र प्रवृत्तिनिमित्तविशेषे तात्पर्य्यमस्ति लक्षणाया बीजं निन्दापरत्वात्। किञ्च सर्व्वत्रान्वयानुपपत्तिरेव लक्षणाबीजं यष्टीः प्रवेशयेत्यादावपि प्रकरणादिना पुरस्कारादिप्रयोजनकत्वं प्रवेशनस्यावगतं तादृशेच प्रवेशनादौ यष्ट्यादेरनन्वयात् तात्पर्य्यानुपपत्तेरपि तात्पर्य्यमज्ञात्वा ज्ञातुमशक्यत्वात्। अथ प्रकरणादेरननुगमः तात्पर्य्यव्याप्यत्वेन तदनुगमे तात्पर्य्यानुपपत्तिरेव तद्बीजमस्तु लाघवादितिचेत् न धूमादिवदननुगतस्यापि व्याप्यत्वाविरोधात्। तस्मात् गवयशब्दः कस्यचिद्वाचकः शिष्टप्रयुक्तत्वादिति सामान्यतो निश्चितेऽपि गवयत्वविशिष्टो धर्म्मी गवयपदवाच्य इति लाघवान्निर्णेयम्। तच्च प्रमाणसहकारि नच तस्यां दशायां प्रमाणान्तरमस्त्यतो यत् प्रमाणसहकारि तत्प्रमाणान्तरमास्थेयम्। अस्त्वनुमानं तथाहि गवयशब्दो गवयत्वविशिष्टवाचकः असति वृत्तान्तरेऽभियुक्तैः प्रयुज्यमानत्वात् गवि गोशब्दवदिति चेत् न गवयत्वविशिष्टो यो धर्म्मी तस्य वाचकत्वग्रहेऽपि गवयत्वप्रवृत्तिनिमित्तत्वासिद्धेः। नच शक्तिमज्ञात्वा वृत्तान्तरं क्वापि अवधारयितुं शक्यते सामानाधिकरण्यमात्रस्य निमित्तोपपत्त्याप्यसामाधारण्यात्। अथ गोसादृश्यनिमित्तागोरवस्थान-

वतारेणानोपमानस्याप्यनवतारः । तथा च तर्केण तस्य प्रवृ
त्तिनिमित्तत्वेऽवगते गवयपदं गवयत्वप्रवृत्तिनिमित्त
इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वात् यन्नै
तन्नैवमितिचेन्न तर्कस्यानिश्चायकत्वात् । न चायं तर्को व्याप्ति
ग्रहमूलको येन विपर्य्ययानुमानादर्थासिद्धिः । अथ गवयप
सप्रवृत्तिनिमित्तकमिति सामान्यतो दृष्टमेव तर्कसहकृ
गवयपदस्येतराप्रवृत्तिनिमित्तकत्वं परिच्छिनत्ति नतु मान
न्तरं कल्पयित्वा तर्कः सहकारी कल्प्यते इति चेन्न इदं स
वृत्तिनिमित्तकमन्यत्र न प्रवृत्तिनिमित्तमिति बुद्धावि
गवयत्वप्रवृत्तिनिमित्तकं गवयपदमिति मानान्तरं वि
प्रतीतेः अनुमितेर्व्यापकतावच्छेदकत्वप्रकारताकत्वनियमा
अथ यथेच्छायां सामान्यतो दृष्टेन विशेषबाधसहकृतेनान
दृव्याश्रितत्वं प्रतीयते अन्यथा विशेषण (ग्रहस्य तद्विपर्य्यय
वा प्रमाणत्वात्) बाधकानां धृथियाद्यैकैकमात्रव्यतिरे
विषयकत्वं जन्यद्रव्यानाश्रितत्वं केन ग्राह्यम् । तथात्वा
गौरवाख्यतर्कसहकृतसामान्यतो दृष्ट्यादितया प्रवृत्तिनि
मित्तकत्वं ज्ञायते पश्चाद्व्यतिरेकी स्यात् काप्यप्रमाणान्तर
पेक्षया क्लृप्तप्रमाणसहकारित्व युक्तत्वादितिचेन्न इच्छाय
मेकैकबाधसहकृतापरापरबाधकैरेव तावद्रूपविशिष्टवैशिष्ट्
दन्यद्रव्यानाश्रयत्वपरिच्छेदात् न तु सामान्यतो दृष्टेन विशेषण
तयोपस्थित्यैव विशिष्टवैशिष्ट्यबोधनिर्व्वाहात् तर्कानवता
दशायां तस्य तदपरिच्छेदकत्वाच्च । न च व्याप्तिपरमि
वाक्यं यो गोशब्दः स गवयपदार्थ इतिवाक्यादवगतव्याप्तिरन

मिनुयादयं गवयपदवाच्यो गोसदृशत्वात् अतिदेशकालावगत-पिण्डवदिति वाच्यं न हि गोसदृशं ज्ञात्वाऽनेन दृष्टः सपर्किं-शब्दवाच्य इति किन्तु सामान्यतो गवयपदार्थमवगम्य स कीदृगिति तथाच यद्योगप्रायमाख्यां तस्यैवार्थत्वं ततः किं तेन। अथ लक्षणापरमिदं वाक्यं किं लक्षणकोऽसाविति प्रश्नार्थः एवञ्च प्रयोक्तव्यं अयमसौ गवय इति व्यवहर्त्तव्यो गोसदृशत्वात् यस्तु न तथा नासौ गोसदृशः यथा हस्तीतिचेन्न न हि हस्त्यादीनां विपक्षत्वे प्रमाणमस्ति सर्व्वप्रयोगस्य दुर्ज्ञा-नत्वात् कतिपयव्यवहारस्यानैकान्तिकत्वात् अथ कीदृक् किं लिङ्गं इति प्रश्नार्थो नन्वनुनलिङ्गमज्ञात्वा गवयपदस्य वाच-कत्वं कस्यचिद्वाच्यत्वमवगतं येन तदर्थप्रश्नः। अथ प्रवृत्ति निमित्तविशेषे लिङ्गप्रश्नो गवयपदं येन निमित्तेन वर्त्तते तस्य किं लिङ्गमित्यर्थ इति चेन्नहि तदनुमेयमेवेत्यनेन निश्चितं येन तथा स्यात् ज्ञानहेतुमात्रप्रश्ने तद्विशेषेणोत्तर-मितिचेन्न अविशेषादिन्द्रियसन्निकर्षमप्युत्तरयेत्। वनं गतो द्रक्ष्यति। तस्मान्निमित्तभेदे एवायं प्रश्नः कीदृग्गवयः केन निमित्तेन गवयपदं प्रवर्त्तते गवयत्वस्य साक्षादुपदर्श-यितुमशक्यत्वात् दृष्टस्तदुपलक्षणं सादृश्यमाचष्टे पश्चादृष्टेऽपि पिण्डेऽतिदेशवाक्यं स्मरतस्तर्कसहकारेण गवयत्वविशिष्टो धर्म्मी गवयशब्दवाच्य इति प्रवृत्तिनिमित्तविशेषपरि-च्छित्तिरुपमानफलम्। अथ गौरवेणान्यानिमित्तकत्वे सनिमित्तकत्वादिति व्यतिरेकिण एव गवयत्वप्रवृत्तिनिमि-त्तकत्वधीरितिचेत् न व्याप्यमूलकतया गौरवग्रहस्य तद्विप-

र्थ्यस्य वा अप्रमाणत्वात् तर्कव्यपदेश्यशक्त्यप्रमाणसहकारित
मात्रेण अन्यनिमित्तशङ्कायां कथमुपमानमिति चेत् न गौर
सहकृतोपमानादेवान्यानिमित्तकत्वे सति सनिमित्तकत
परिच्छेदात् । अस्तु गौरवसहकृतात् सनिमित्तकत्वग्राहक
मानादेव गवयत्वनिमित्तकत्वसिद्धिः । न चैवं व्यतिरेकोच्छेद
कार्य्यत्वे पर्य्यवसिते बाधकानन्तरं व्यतिरेक्युदयात् यत्र च प्रथ
बाधकाभावस्तत्र कार्य्यत्वादेव फलं न । अन्यानिमित्तक
सनिमित्तकत्वं वेति बुद्धावपि गवयत्वनिमित्तकं गवयप
मिति बुद्धेरसिद्धेरुक्तत्वात् । किं चात्र व्यवहारेण प्रवृत्ति
विषये पदशक्तिग्रहो नतु तन्निमित्ते तेनाप्रतिबन्धात् न
गौरवादिव्याघ्रत्वादिनेतरनिरासेन गोत्वादेर्निमित्तत्वग्रह
गौरवादेरतन्त्रत्वात् अप्रमाणत्वाच्च । तस्मात् व्यक्तौ शक्ति
ग्रह एव लाघवादिसहकृतोऽन्यतरनिमित्तकत्वे सति गोत्वादि
निमित्तकत्वमवधारयति तद्यथेति देवोपमानमिति कश्चि
तन्न शक्तिग्राहकमेव लाघवादिसहकृतं निमित्तमवधारयं
यथा चित्रादौ कर्तृग्राहकं कर्तुरेकतास् । अथैवं भिन्नकर्तृके
लाघवात् कार्य्यत्वभेदकर्तृतां चकोऽपि बोधयत्येव पश्चाद्बाधके
त्यज्यते इति चेत्तर्हि सद्धेतोराभासानुमितिः साध्याव्यभिचार
द्यभावादिति चेन्न बाधितविषयत्वेनाभासत्वात् । अतएव
लघुत्वज्ञानन्यायथार्थत्वेन तज्ज्यानुमितेराभासत्वाच्च ।
चोपमितिरेव व्युत्पत्तिरन्यथा तदनिरुक्तेरिति वाच्यं व्यु
पत्तेः शब्दसहकारित्वेन मानान्तरत्वेन व्याघातात् । व्यु
पत्तिस्तु या बुद्धिमात्राद्य पदार्थबोधः सा । अन्ये तु यत्तदादि

पदानामनुगतैकरूपाभावेनैकत्वापि शक्तिग्रहादन्यत्वापि शब्द-व्यवहार इति पदान्तरवैधर्म्यादस्तु मानान्तरमुपमानमिति चेन्न बुद्धिस्थत्वादिनोपलक्षणेन साधारणेन शक्तिग्रहात्। बुद्धिविशेषादेव विशेषपर्य्यवसानं तथैव व्यवहारात् अन्यथा मानान्तरेऽपि दोष:। नन्वनुगतरूपप्रतीतावेव तत्र शक्ति-ग्रह:। यत्तु मात्रादिपदानां जनकस्त्रीत्वादिना शक्तिग्रहे कथं मैत्रमात्रादिजाभ: नच समभिव्याहारविशेषादिति वाच्यं पदार्थो हि पदार्थान्तरमन्वेति जनकस्त्रीत्वं च तथेति कथं मैत्रादिना जनकत्वान्वय इति मानान्तरमिति तन्न जनकस्य जन्यापेक्षत्वेन योग्यत्वादिना मैत्रेणान्वयात्। लक्षणं तु उपमिति करणत्वम्। उपमितिश्च जाति:। न चासिद्धि:, कारणविशेषे कार्य्यवैजात्यमप्रयुक्तमिति कारणविशेषव्यङ्ग्य-त्वात् यद्वा नियतधर्मसमानाधिकरणप्रवृत्तिनिमित्तज्ञानमुप-मिति: प्रकारतया शब्दशक्तिग्रहविषयानिमित्तत्वम्। अगृहीत-समयसंज्ञया वाक्यार्थसामानाधिकरण्येन संज्ञानिमित्तपरि-च्छेदो वा। किञ्चिद्वाक्यार्थसामानाधिकरण्येन संज्ञानिमित्तप-रिच्छेदो वा। गोसदृशो नवय इत्यत्रापि परम्परया तत्र तात्पर्य्यमस्त्येवेति सर्व्वमवदातम्॥ शुभमस्तु॥

इति श्रीमहामहोपाध्यायगङ्गेशचिन्तामणिविरचिते श्रीतत्त्वचिन्तामणौ, उपमानखण्ड: समाप्त:। इति शुभम्।

वि, ए, उपाधिधारिणा श्रीजीवानन्द-विद्यासागर-भट्टा-चार्य्येण संस्कृत:॥ 96255

INSTITUTE OF

२४	कुमारसम्भव—उत्तरखण्ड	...	॥
२५	अष्टकम् पाणिनीयम्	...	॥
२६	वाचस्पत्यम् [संस्कृत-शब्दाभिधान]	...	६०
२७	कादम्बरी—सटीक	...	४
२८	राजप्रशस्ति	...	=
२९	अनुमानचिन्तामणि तथा अनुमानदीधिति		४
३०	सर्वदर्शनसंग्रह	...	२
३१	भामिनीविलास—सटीक	...	१
३२	हितोपदेश—सटीक	...	१
३३	भाषापरिच्छेद मुक्तावलीसहित	...	१
३४	बहुविवाहवाद	...	।
३५	दशकुमारचरित—सटीक	...	१॥
३६	परिभाषेन्दुशेखर	...	१॥
३७	क्रियाकल्पद्रुम (बोपदेवकृत धातुपाठ)	...	॥
३८	चक्रदत्त (वैद्यक)	...	२॥
३९	उणादिसूत्र—सटीक	...	२
४०	मेदिनी कोष	...	२॥
४१	पञ्चतन्त्रम् [श्रीविष्णु-शर्म्म-सङ्कलितम्]	...	२॥
४२	विद्वन्मोदतरङ्गिणी (चम्पूकाव्य)	...	॥
४३	भाषवचम्पू	...	।=
४४	तर्कसंग्रह (इंराजी अनुवाद सहित)	...	॥
४५	प्रसन्नराघवनाटक (श्रीजयदेवकविरचित)		१॥
४६	विवेकचूड़ामणि [श्रीमत्शङ्कराचार्य्य विरचित]		।=
४७	काव्यसंग्रह [सम्पूर्ण]	...	५
४८	लिङ्गानुशासन (सटीक)	...	।
४९	ऋतुसंहार—सटीक	...	।=

विक्रमोर्वशी—सटीक ... १॥
वसन्ततिलक भाण ... ।=
गायत्री [ब्रह्मपरक] ...
सांख्यदर्शन (भाष्यसहित) सांख्यप्रवचन भाष्य २
भोजप्रबन्ध ... ॥
नलोदय—सटीक ... ॥=
ईश केन कठ, प्रश्न, मुण्ड, माण्डुक्य, (उपनिषद्)
[शाङ्करभाष्य तथा आनन्दगिरिकृत टीका
सहित] ... ५
छान्दोग्य (उपनिषद्) [शाङ्करभाष्य तथा
आनन्दगिरिकृतटीका सहित] ... ५
तैत्तिरीय ऐतरेय (उपनिषद्) [शाङ्करभाष्य
तथा आनन्दगिरिकृतटीका सहित] ... २
बृहदारण्यक (उपनिषद्) [भाष्यसहित] १०
सुश्रुत ... ४
शार्ङ्गधर [वैद्यक] ... २॥
वेतालपञ्चविंशति [जम्भलदत्त विरचिता]
तथा सिंहासन द्वात्रिंशत् कथा ... १॥
पातञ्जलदर्शन [महर्षि वेदव्यासकृत भाष्यसहित] ४
आत्मतत्त्वविवेक [वीरराघवाधिकार] ... २
मुक्तिकोपनिषद् ...
उपमानचिन्तामणि ... ॥

कलिकातासंस्कृतविद्यामन्दिरे—वि, ए, उपाधिधारिणः
वानन्द-विद्यासागर-भट्टाचार्यस्य सकाशात् लभ्यानि